## प्रधान संपादकीय वक्तव्य

★

राजस्थान एवं गुजरात, मालवा आदि प्रदेशोंमें प्राचीन हस्तलिखित ग्रन्थोंके बिखरे हुए एवं जीर्णशीर्ण दशामें जो संग्रह प्राप्त होते हैं उनमें संस्कृत, प्राकृत, अपभ्रंश एवं प्राचीन राजस्थानी-गुजराती भाषामें रचित छोटी बडी ऐसी सैंकडों ही साहित्यिक कृतियां उपलब्ध होती हैं जो अभी तक प्रायः अज्ञात और अप्रसिद्ध हैं। विद्वानोंका लक्ष्य प्रायः अभीतक उन्हीं सुप्रसिद्ध और सुज्ञात ग्रन्थोंके अन्वेषण एवं संशोधनकी तरफ रहा है जो यत्रतत्र यथेष्ट परिमाणमें उपलब्ध होते हैं। ग्रन्थोंके संपादन और प्रकाशन के विषयमें भी प्रायः यही प्रथा चली आ रही है। सुप्रसिद्ध और सुज्ञात ग्रन्थोंके सिवा छोटी छोटी एवं प्रकीर्ण रचनाओंके विषयमें विद्वानोंका विशेष लक्ष्य नहीं जाता है और इसलिये अभी तक ऐसी रचनाओंके संपादन-प्रकाशनका मुख्य प्रयत्न प्रायः नहींसा हुआ है। हमारे प्राचीन इतिहास एवं सांस्कृतिक सामग्रीकी दृष्टिसे इन फुटकर रचनाओंमें जो ज्ञातव्य छिपे पडे हैं उनकी तरफ हमारा लक्ष्य बिल्कुल नहीं गया है-ऐसा कहा जाय तो कोई अत्युक्तिकी बात नहीं होगी।

राजस्थान पुरातत्त्वान्वेषण मन्दिरका कार्य प्रारंभ करते समय, हमारा मुख्य लक्ष्य इस प्रकारके प्रकीर्ण साहित्यका अन्वेषण, संग्रह, संरक्षण, संशोधन एवं प्रकाशन आदि करनेका रहा है और तदनुसार, राजस्थान पुरातन ग्रन्थ-माला द्वारा ऐसी अनेकानेक साहित्यिक रचनाओंको, सुयोग्य विद्वानों द्वारा शोधित-संपादित कराकर प्रकाशमें रखनेका आयोजन हमने किया है।

संस्कृत और प्राकृत भाषामें रचित मुक्तक-प्रकीर्णक पद्योंके फुटकर संग्रहोंके नाम पद्यावलि, मुक्तावलि, हारावलि, मणिमाला, रत्नमाला, पुष्पमाला आदि रूपमें प्रसिद्ध हैं। कुछ कृतियां पद्योंकी संख्याके अनुसार भी प्रसिद्ध हैं—जैसे पांच पांच पद्योंका संग्रह पंचक, आठ आठ पद्योंका संग्रह अष्टक, १० पद्योंका संग्रह दशक, इस तरह षोडशक १६ पद्योंका, २० पद्यात्मक रचना विंशतिका, २४ पद्यात्मक कृति चतुर्विंशतिका, २५ पद्योंकी पंचविंशतिका, ३० की त्रिंशिका, ३२ की द्वात्रिंशिका, ५० पद्योंके संग्रहवाली रचना पंचाशिका या पंचाशक, ७० पद्योंकी समूहात्मक रचना सप्ततिका एवं सौ पद्योंके संग्रह 'शतक' आदि नामसे उल्लिखित किये जाते हैं।

राजस्थान पुरातन ग्रन्थमालाके १५ वें पुष्पके रूपमें पाठकोंके हाथमें जो ग्रन्थ उपस्थित है वह शृंगारहारावलि भी इसी प्रकारकी एक मुक्तक-पद्योंकी संग्रहरूप संस्कृत रचना है। संस्कृतके भिन्न भिन्न छन्दोंमें, रचे हुए १०१ पद्योंके

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

इस छोटेसे संग्रहको कर्त्ताने शृंगारहारावलि नामसे अभिहित किया है जिससे इसका विषय भी स्पष्ट ही सूचित हो जाता है। कविने समय समय पर स्फुरित अपनी कल्पनाके अनुसार शृंगाररससे संबन्धित जो मुक्तक पद्य बनाये होंगे उनमेंसे चुने हुए १०१ पद्योंके संकलन रूपमें यह हारावलि ग्रथित की गई है। इस प्रकारके शृंगाररसविषयक १०० पद्योंका समुच्चय महाकवि भर्तृहरिका बनाया हुआ शृंगारशतकनामक संस्कृत साहित्यका एक उत्कृष्ट मुक्तकसंग्रह सुप्रसिद्ध ही है और इसी तरहका महाकवि अमरुकका बनाया हुआ १०० पद्योंका संचयरूप अमरुकशतक नामका सुन्दर काव्यसंग्रह भी सुविश्रुत है। ऐसी ही एक अन्य और उत्तम रचना नागकविकी है जिसे नागशतक या भावशतक भी कहते हैं। कहनेका तात्पर्य है कि इस प्रकारके मुक्तक-पद्योंके संकलन-स्वरूप अनेकानेक साहित्यिक प्रबन्ध उपलब्ध होते हैं जिनमेंसे ऊपर्युलिखित जैसे कुछ एक ही प्रबन्ध अभी तक प्रकाशमें आये हैं।

गुजरात विद्यासभा, अहमदाबादके प्राचीन हस्तलिखित ग्रन्थसंग्रहमें राजस्थान एवं गुजरातसे प्राप्त ऐसी कई प्राचीन लिखित पोथियां जीर्ण-शीर्ण एवं उपेक्षित दशामें उपलब्ध हैं जिनकी तरफ सहसा विद्वानोंका लक्ष्य आकृष्ट नहीं हो पाता। डॉ. प्रियबाला शाहको रिसर्च स्कॉलरके रूपमें जब इस संग्रहका निरीक्षण करनेका सुयोग मिला तो इनका लक्ष्य इन पोथियोंकी तरफ गया और इनने इनमेंसे प्रस्तुत शृंगारहारावलि, कृष्णगीति, नृत्तसंग्रह, रत्नकोश आदि जैसी कई फुटकर परन्तु साहित्यकी दृष्टिसे महत्त्वकी रचनाओंके विषयमें अपने प्रधान अध्यापक प्रो. रसिकलाल परीखसे जिक्र किया। प्रो. परीखने इन रचनाओंका अध्ययन और प्रतिलिपि आदि करनेकी प्रेरणा की और प्रसंगवश मुझे इससे सूचित किया। प्रतिलिपि और मूल लिखित पोथियोंका अवलोकन करने पर मुझे ये रचनाएं राजस्थान पुरातन ग्रन्थमाला द्वारा प्रकाशित करने योग्य मालूम दी। अतः मैंने सुश्री प्रियबालाको इनका संपादन करनेकी प्रेरणा की जिसके फलस्वरूप यह शृंगारहारावलि अब विद्वानोंके सम्मुख उपस्थित हो रही है।

डॉ. प्रियबाला शाह संस्कृत साहित्यके विविध अंगोंके अध्ययन एवं अन्वेषणमें विशेष रुचि रखती है। इनने बंबई-युनिवर्सिटीकी एम्. ए. की परीक्षा भारतीय प्राचीन इतिहास और संस्कृतिके विषयको ले कर पास की और पीएच्. डी. की डिग्रीके लिये विष्णुधर्मोत्तरपुराणान्तर्गत ललितकला-विषयक प्रकरणोंका परीक्षणात्मक संपादन कर उस पर विवेचनात्मक बृहत्-निबन्ध (थिसिस) लिख कर, उक्त युनिवर्सिटीको उपस्थित किया जिसके परिणामस्वरूप इनको युनिवर्सिटीने डॉक्टरेटकी पदवी प्रदान की। प्रस्तुत शृंगारहारावलिका संपादन कार्य समाप्त होने पर था तभी इनने अपने विशेष अध्ययनके लिये फ्रान्सकी पेरिस युनिवर्सिटीमें प्रविष्ट हो कर, वहांके संस्कृतज्ञ प्राध्यापक प्रो. रेनॉ और दुपॉं आदिके मार्गदर्शनमें सूर्यपूजा एवं कृष्णगीति और

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

नृत्तसंग्रह नामक प्रबन्धोंके आधार पर प्रस्थापित भारतीय संगीत और नृत्य आदि विषयों पर विस्तृत निबन्ध लिख कर पेरिसकी शोरबॉन युनिवर्सिटीसे डी. लिट्. की उच्चतम पदवी प्राप्त की । डॉ. प्रियबालाकी अध्ययन विषयक इस प्रकारकी सुयोग्यताके लिये यहां पर मैं अपना हार्दिक अभिनन्दन प्रकट करना चाहता हूं ।

वस्तुतः प्रस्तुत ग्रन्थमालाके प्रारंभसे ही मुझे गुजरात विद्यासभाके अंगभूत प्रो. श्री रसिकलाल परीख, डॉ. श्री हरिप्रसाद शास्त्री, डॉ. श्री जितेन्द्र जेटली, डॉ. सुश्री प्रियबाला शाह, अध्यापक श्री के. का. शास्त्री आदि मेरे प्रिय विद्वन्मित्रमंडलका विविध ग्रन्थोंके संपादन और प्रकाशन आदि कार्योंमें अभीष्ट सहयोग प्राप्त होता रहा है । अतः इसके लिये मैं अपना सविशेष हार्दिक कृतज्ञभाव प्रकट करना चाहता हूं ।

अनेकान्त विहार
अहमदाबाद.
आषाढशुक्ल ११. वि. सं. २०१३
( १८–७–५६ )

मुनि जिनविजय
सम्मान्य संचालक
राजस्थान पुरातत्त्वान्वेषण मन्दिर
ज य पु र

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

There are in Sanskrit Literature many similar collections of hundred erotic verses of other authors also. The two most well-known are the Śṛngāra Śataka of Bhartṛhari and the Amaru Śataka of the poet Amaru. There is also the Bhāvaśataka or Nāgaśataka of the poet Nāga. This Śṛngārahārāvalī is one such work.

The Gujarat Vidya Sabha of Ahmedabad has a valuable library of mss. collected from Rājasthāna and Gujarat – which has not attracted the attention that it deserves. When Dr. Priyabala Shah was working as a research scholar in the B. J. Institute of Gujarat Vidya Sabha, she examined a number of these mss. She found amongst them some small but interesting works. Prof. Parikh, the Director of the Institute, suggested to her that she might study and edit these. She selected Śṛṅgārahārāvalī along with Kṛṣṇagīti, Nṛttasaṁgraha and Ratnakośa. My friend Prof. Parikh spoke to me about these new and unpublished works. I was also shown the press-copies of these. On going through them I felt that they deserved to be included in the Rājasthāna Purātana-Granth-mālā. I suggested that Dr. Priyabala might edit them for this series. She acceded to my request. Hence these publications in the Rājasthāna Purātana-Granthamālā.

Dr. Priyabala Shah has interest in many fields of Sanskrit research. She took her M. A. degree in Ancient Indian Culture from the Bombay University. She got her Ph. D. degree in Sanskrit from the same University on a thesis on a critical edition of the third kāṇḍa of Viṣṇudharmottara Purāṇa with an elaborate introduction on the fine arts as practised in ancient India. After finishing her work on Śṛngārahārāvalī, she went to Paris and worked in the University of Sorbonne under the guidance of Prof. Renou and Prof. Dupont. She got her D. Litt. (très honorable) from the University of Paris on her thesis on the Iconography of Sun as well as on Kṛṣṇagīti and Nṛttasaṁgraha. I take this opportunity to congratulate her on her brilliant academic attainments.

In the making of this series, I received from the start, enthusiastic co-operation from my scholar-friends of Gujarat Vidya Sabha, particularly Prof. Rasiklal Parikh, Dr. Hariprasad Shastri, Dr. Jitendra Jetly, Dr. Priyabala Shah and Pandit K. K. Shastri. I express my sincere thanks to them.

Muni Jinavijaya
Hon. Director,
Rajasthan Oriental Research Institute,
JAIPUR.

Anekanta Vihar
Ahmedabad.
18-7-56

P. P. Ac. Gunratnasuri M.S.    Jin Gun Aaradhak Trust

संभूत for संभृत ), in some, grammatically incorrect ( e. g. ślo. 34 दयत तमसि, ślo. 63 वीभ्रती, ślo. 65 प्राणेश्वर ) and in some, did not yield any sense or the sense was not as would be required by the context ( e. g. ślo. 7 हतन्यसूनिह, ślo. 8 वक्षोजन्मकिशोरता, ślo. 34 दयत तमसि मं, and, ślo. 30 कर्णाटीकुटकोटि. )

In making these emendations, it is not possible to exclude altogether the subjective test of propriety. It has been, however, controlled by metre and grammar. In emending the readings, I have mainly relied upon the objective consideration of the confusions and mistakes which are likely to arise by the similarity of letters ( like त and न, म and स, ष and च, च and व, क्र and क्त्र, प and य etc ). One cannot say how far these emendations represent the author's text until more mss. of the work are discovered.

## III

### The Author

Śrīharṣa is a wellknown name in Sankrit literature. Several persons who might have lived centuries apart have borne this name. In fact we know at least two great Harṣas : one the emperor Harṣa of Kanouj ( 6th cent. A. D. ) and the other Śrīharṣa ( 12th cent. A. D. ) a great poet and Vedantist,—the author of Naiṣadhīyacarita and Khaṇḍana-khaṇḍakhādya. Scholars have discovered several other Harṣas[1] also. Our problem is to find out whether our author is to be identified with one of the known Harṣas or whether he is a new find. At the outset I must say that I have not been able to find any decisine evidence which would help one to decide the question. The only thing, therefore, that I could do was to compare Śṛṅgārahārāvalī with, on one side, the works attributed to Harṣa of Kanouj, and on the other, with the Naiṣadhīyacarita of the Vedantist poet Śrīharṣa. Here also I must say that this comparative study has not given me any definite clues. Yet if one is allowed to express one's inclination based upon such a comparative study, one might say that it is more likely that the author of Naiṣadhīya might have composed this work in his earlier years to emulate works like the Amaruśataka. What goes against this hypothesis is the fact that Śriharṣa has not

1. There are as many as five different individuals, possessing the same appelation Śriharṣa, known to Sanskrit literature: (1) younger brother of the author of the Kāvyapradīpa, (2) the author of the Naiṣadhakāvya, (3) a king of Kashmir to divert whose queen, Somadeva wrote the Kathāsaritsāgara, (4) the father of Muñja and the grand-father of king Bhoja of Dhārā, (5) the king of Sthāṇeśvara. See P.IX Introduction : Nāgānanda of Śrī Harśa-edited by Karmarkar ( Second edition, 1923 )

P. P. Ac. Gunratnasuri M.S.    Jin Gun Aaradhak Trust

mentioned Śṛṅgārahārāvalī in the references to his works made at the end of the several cantos of Naiṣadhīya. This absence of reference, however, may be explained on the assumption that he might have not regarded this work, presumably of his earlier years, as sufficiently important to stand with his major works.

It is wellknown that Śrīharṣa uses many unusual words in his Mahākāvya. Some of these are sanskritised forms of Deśya words, e. g. the use of the word घुसृण in the sense of saffron( Naiṣ. viii, 80 ). Now we find that, this word has been used in this work also ( ślo. No. 59 ). In addition, the use of the word नीरङ्गिका in ślo. 12 is to be specially noted. As I have explained in the notes it is a Sanskritised form of the deśya word णीरङ्गी or णिरङ्गी This common tendency of using the Sanskritised forms of the deśya words, by itself, is in no way conclusive; yet if we take this fact along with the other fact that Śrīharṣa and not Harṣa is the proper name of the authors of Naiṣadhīya and Śṛṅgārahārāvalī, we may be permitted the guess that both of them might refer to the same person. This is not good logic, but not so bad as to exclude a guess.

Whoever may be this Harṣa, he seems to be a person very familiar with the regions of Gujarat and Rājasthāna, as is evident from ślo. 12 (नीरङ्गिका), ślo. 46. (जम्बूतरु) ślo. 73 (माञ्जिष्ठ), ślo. 73 (पटान्तेवासित्य) The reference to कर्णाटी in ślo. 30 can be explained as something conventional because it is a sort of कविसमय.

The two स्रग्धरा verses at the end of the Ms., describing in one the beautiful Nāgara women of Vaḍanagara and in the other the surpassing beauty of its cowherdesses, clearly indicate that the copy of this Ms. was made at Vaḍanagara. Śrīharṣa, the author of Naiṣadhīya, had a great vogue in Gujarat and its oldest commentaries were written solely in Gujarat.[1] So if Śṛṅgārahārāvalī is the work of the author of Naiṣadhīya it would be no surprise if its only known Ms. was copied at Vaḍanagara. However, as I said above, the evidence is in no way conclusive and the question of the identity of the author of Śṛṅgāra-hārāvalī remains an unsettled problem.

## IV

*Age*– The Age of this work is undoubtedly earlier than this ms. i. e. 1733 Saṁvat ( i. e. 1677 A. D. ). If it is a work of the author of Naiṣadhīya its date would be, that of Śri Harṣa (12th cent. A. D.) Beyond this we connot say anything further about the age of Śṛṅgāra-hārāvalī.

1. See Literary Circle of Mahāmātya Vastupāla–B. J. Sandesara ( Chap. 5. pages 52–54 ).

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

I take this opportunity of expressing my sincere thanks to revered Āchārya Śri Jinavijayaji, the Honorary Director, of Rajasthan Puratattva Mandir, Jaipur, who is known for the encouragement he gives to young students in the field of research. I am greatly indebted to him for not only accepting this work for publication in Rajasthan Puratattva Series but for helping me in learning the craft of editing Sanskrit texts.

I am also indebted to Prof. K. V. Abhyankar, Honarary Professor of Sanskrit, B. J. Institute of Learning and Research, Ahmedabad, one of my teachers who guided me in my thesis and taught me how to use Mss. for editing a work.

The Sanskrit commentary in the notes is the work of the wellknown Vaiyākaraṇa Pandit Satyadeva Miśra of the Brahmachārī Sanskrit Pathaśāla-Ahmedabad. I am much indebted to him for this co-operation.

I had the good fortune of discussing the various emendations with Pt. Sukhalalji and Śri. K. K. Shastree.

Lastly, I must not forget to thank Prof. R. C. Parikh, Director of the B. J. Institute of Learning and Research, Ahmedabad, for the valuable assistance that I have received from him in connection with this work.

I am alone, however, responsible for the short-comings of this my first work. Helpful criticism will be thankfully received.

Ahmedabad — **Priyabala Shah**

1-7-1952.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# छन्दोनुक्रमणिका

अनुष्टुप् S'lo s. 6, 7, 16, 36, 37, 50, 51, 66, 67, 68, 82, 83, 91

अनुष्टुप् गायत्रैः ॥२३॥

चतुष्पादित्यनुवर्तते । गायत्रैरष्टाक्षरैः पादैश्चतुष्पाच्छन्दः अनुष्टुप्संज्ञं भवति । [ पृ० ६२ ]

उपजाति S'lo.s. 74, 76.

आद्यन्तावुपजातयः ॥ २३ ॥

आद्यन्ताविति अनन्तरोक्ताविन्द्रवज्रोपेन्द्रवज्रयोः पादावाद्य । [ पृ० २९१ ]

वंशस्थेन्द्रवंशापादयोरपि सङ्करादुपजातयो भवन्ति । [ पृ० २९४ ]

⏑ – ⏑ – ⏑ ⏑ – ⏑ – –

– – ⏑ – – ⏑ ⏑ – ⏑ – –

पृथ्वी S'10. s. 19, 32, 55, 63

पृथ्वी ज्सौ ज्सौ य्लौ ग् वसुनवकौ ॥ १७ ॥

अष्टभिर्नवभिश्च यतिः [ पृ० ३३८ ]

ज स ज स य ल ग

⏑ – ⏑ ⏑ ⏑ – ⏑ – ⏑ ⏑ ⏑ – ⏑ – – ⏑ –

मालिनी S'lo.s. 34, 59.

मालिनी नौ म्यौ य् ॥ १४ ॥

अष्टभिः सप्तभिश्च यतिः । [ पृ० ३३४ ]

⏑ ⏑ ⏑ ⏑ ⏑ ⏑ – – – ⏑ – – ⏑ – –

मन्दाक्रान्ता – S'lo.s. 33, 40, 41; 54.

मन्दाक्रान्ता म्भौ न्तौ त्गौ ग् समुद्रर्तुस्वराः ॥ १९ ॥

चतुर्षु षट्सु सप्तसु च यतिः । [ पृ० ३४१ ]

– – – – ⏑ ⏑ ⏑ ⏑ ⏑ – – ⏑ – – ⏑ – –

वसन्ततिलका S'lo.s. 3, 10, 11, 12, 13, 54, 57, 60, 85, 86, 87.

वसन्ततिलका त्भौ जौ गौ ॥ ८ ॥ [ पृ० ३२९ ]

– – ⏑ – ⏑ ⏑ ⏑ – ⏑ ⏑ – ⏑ – –

वंशस्थ—S'lo.s. 23, 24, 25.

वंशस्था ज्तौ ज्रौ ॥ ३४ ॥ [ पृ० ३०३ ]

⏑ – ⏑ – – ⏑ ⏑ – ⏑ – ⏑ –

शार्दूलविक्रीडित—S'lo.s. 1, 2, 4, 5, 8, 9, 14, 15, 17, 20, 26, 27, 28, 29, 30, 31, 35, 38, 39, 42. 43, 44, 45, 46, 47, 48, 49, 52, 53, 61, 65, 73, 76, 77, 79, 80, 88, 90, 92, 93, 94, 95. 97, 98, 99, 100, 101.

शार्दूलविक्रीडितं म्सौ ज्सौ तौ गादित्यऋषयः ॥ २२ ॥

द्वादशभिः सप्तभिश्च यतिः ॥ [ पृ० ३४९ ]

– – – ⏑ ⏑ – ⏑ ⏑ ⏑ – – – ⏑ – – ⏑ –

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

शिखरिणी—S'lo.s. 64, 70, 71, 78.

शिखरिणी यमौ न्सौ भ्लौ गृतुरुद्राः ॥ २० ॥
षट्स्वेकादशसु च यतिः [ पृ० ३४२ ]
⏑ – – – – – ⏑ ⏑ ⏑ ⏑ ⏑ – – ⏑ ⏑ ⏑ –

स्रग्धरा—S'lo s. 56, 62, 72, 75, 84 and two s'lokas of the footnote.

स्रग्धरा म्रौ भ्नौ यौ य् त्रिः सप्तकाः ॥ २५ ॥
सप्तसु सप्तसु सप्तसु च यतिः [ पृ ३५० ]
– – – – ⏑ – – ⏑ ⏑ ⏑ ⏑ ⏑ ⏑ – – ⏑ – – ⏑ – –

स्वागता—S'lo.s. 81.

स्वागता र्नौ भ्गौ ग् ॥ २९ ॥ [ पृ० २९९ ]
– ⏑ – ⏑ ⏑ ⏑ – ⏑ ⏑ – –

हरिणी—S'lo.s. 18, 21, 22, 69, 89.

हरिणी न्सौ म्रौ स्लौ गृतुसमुद्र-ऋषयः ॥ १६ ॥
षड्भिश्चतुर्भिः सप्तभिश्च यतिः [ पृ० ३३७ ]
⏑ ⏑ ⏑ ⏑ ⏑ – – – – – ⏑ – ⏑ ⏑ – ⏑ –

From पिङ्गलच्छन्दःसूत्रम्
प्रथमसंस्करणम्—१९२८
( कलिकातामहानगर्यां मुद्रितम् )

## शुद्धिपत्रक

| | read as | page | ślo. |
|---|---|---|---|
| स्वाम्बुलौल्यात् | 3a स्वाम्बु लौल्यात् | २ | १२ |
| प्रेमणिलीनतां | प्रेमणि लीनतां | ३ | १५ |
| After the readings | 3a Ms. प्रेमनिभेतकां | ३ Footnote | |
| धृता या | धृताया | ५ | २७ |
| 6 | 9 | ५ Footnote | |
| –ःनिता | –जनितां | ८ | ४६ |
| नेत्यंतनो | नेत्यंतनौ | ९ | ५३ |
| पनर्विचिन्त्य | पुनर्विचिन्त्य | १० | ६० |
| –हमिय | हमियं | १० | ६० |
| कुसुम | कुसुमं | १० | ६२ |
| सलग्नाङ्गीं | संलग्नाङ्गीं | ११ | ६९ |
| वेणीरश्मिः | वेणी रश्मिः | ११ | ७० |
| संतत | संततं | १२ | ७६ |
| नयोञ्जनं | नयोरञ्जनं | १३ | ८४ |
| चक्रचन्द्रा | वक्त्रचन्द्रा | १३ | ८५ |

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

श्रीहर्ष-विरचिता

# शृङ्गारहारावली।

श्रीमकरध्वजाय नमः ।

कामः कौसुमकार्मुकं करतले कृत्वाधिकं कामिनः
कान्ताकान्तकपोलमण्डलतले पत्रावलीकर्मणि ।
युञ्जानो विजयी जगन्ति मदयन् रत्यानुयातोऽनिशं
[1]सौहार्दान्मधुमत्यजन् हि भवतां सौख्याय भूयाद् भुवि ॥ १

षष्ठो जैत्रशरः स्मरस्य जगतां जेतुं [2]जगद्युद्धतो
व्यस्ते सायकपञ्चके विषयिणां चेतः शरव्यं हरन् ।
स्वर्गादप्यतिदुर्लभं करतलप्राप्तश्रियं पार्थिवं
शर्मप्रेम तनोतु भूरि भवतां कान्ताकटाक्षोऽक्षयम् ॥ २

[ वसन्तकालवर्णनम् ]

आधूय [3]चन्दनवनीर्मलयावनीनां
स्थैर्यं भजन्नतितरां कुसुमद्रुमेषु ।
ग्लानिं हरन् सुरतजां मधुरो वधूनां
वातः प्रगेऽतरलयत्[4] सरसीतरङ्गान् ॥ ३

कः शाखी सखि यस्य पुष्पमभवत् पुष्पायुधस्यायुधं
छिन्ने तत्र चिरान्निरायुधदशां धत्ते स चित्तेशयः ।
इत्थं सा सुभग त्वदीयविरहे कन्दर्पसंतापिता
बाला बालसखीजनेन सहिता क्रीडावने भ्राम्यति ॥ ४

कान्ते त्वन्मुखचन्द्रमा अभिनवो दन्तावली चन्द्रिका
प्रत्यादिष्टमहावियोगतिमिरः कौरङ्गनेत्राङ्कितः ।
आश्लिष्यन् कुचचक्रवाकमिथुनं पूर्णेऽपि यस्मिन् मिथस्-
तुङ्गायेत मदेन नेत्रनलिनानन्दं वितन्वन् मुदा ॥ ५

---

1 Ms सौहार्दामधु°. 2 Ms जगदुद्धतो. 3 Ms °वनि° 4 Ms °यन्

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

विद्रावयति संपूर्णो मानिनीमुखचन्द्रमाः ।
दन्तचन्द्रिकया नूनं वियोगविभवं तमः ॥ ६

स्तनौ [1]स्तनान्तरन्यस्तौ मुखं सुमुखि सन्मुखम् ।
ममोत्सङ्गे तवैवास्तु सुश्रोणि श्रोणिमेखला[2] ॥ ७

[3]कुञ्चत्कोकनदश्रियोर्नयनयोः प्रक्षालयन्ती जलैर्-
[4]वक्षोजन्मकिशोरकौ पितृगृहं गच्छन्त्यपाङ्गेन तु ।
मन्दावर्तितकन्धरा प्रियतमं संवीक्ष्य गुर्वन्तिकाद्-
अन्तर्बाष्पनिरुद्धकण्ठकुहरं कान्ता चिरं रोदिति ॥ ८

कान्ता किं कुरुते, रतेषु रमते कामाक्षया हे सखे,
साकं केन रतं, त्वया, ऽहमिह न, त्वं तत्समीपेऽनिशम् ।
साहारेषु मनोऽवलेपवसनेष्विच्छां हि हित्वा सखी
सव्रीडा भवतो रतैरविरतैरन्तःस्थितैर्वर्तते ॥ ९

सौवर्णनूपुररणच्चरणारविन्दा
श्रोणीभरालसगतिर्मृगशावनेत्रा ।
पीनस्तनी सकलचन्द्रमुखी तनोति
तन्वी न कस्य हृदि मोहमहो महान्तम् ॥ १०

अद्याहमालि तलिने सहिता निषण्णा
वार्तासु तस्य निरता सरलाशयत्वात् ।
कान्तेन कामतरलेन भुजोपपीडम्
आलिङ्ग्य मां किमपि तेन कृतं न जाने ॥ ११

तोयान्तरुल्ललितमीनयुगाभिरूप-
नीरङ्गिकान्तरचरन्नयनं प्रियायाः ।
पास्यामि पार्वणसुधाकरचारुवक्त्रं
शीतं सुगन्धि मरुपान्थ इवाम्बुलौल्यात् ॥ १२

1 Ms स्तन्यस्तनिहन्य°. 2 Ms °लां. 3 Ms किञ्चित्. 4 Ms °रता.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

स्वेनैव या वरकुचद्वितयेन नूनं
　　संवर्म्य सम्यगपि मे हृदयं दयालुः ।
वेगातिदुःसहविदारणदारुणेभ्यः
　　सा पश्यति प्रियतमा मम मार्गणेभ्यः ॥　　१३

रात्रौ यत्सखि कौतुकं समभवच्चित्रं तदाकर्ण्यतां
　　कान्तेनाद्य समागतेन शयनासीना समालिङ्गिता[1] ।
एतस्मिन् समये रसान्तरमथावासाद्य चेतोहरं
　　कान्तो मन्मयतामुपागमदहं जाता [2]ततस्तन्मयी ॥　　१४

शय्यायां स्मररागमागतवतोः संपन्नयोरावयोः
　　वार्तालिङ्गनचुम्बनानि बहुधाऽभूवं[3]स्ततोऽनन्तरम् ।
प्राप्ते प्रेमनिलीनतां सखि परां तन्मन्मयत्वादहो
　　तद्योग्यं तदहं चकार करणं मद्योग्यमेव प्रियः ॥　　१५

आक्रान्तहृदयेनाहं सखे सर्वाङ्गसङ्गिना[4] ।
प्रियेण रतनाथेन मोहितेनाद्य[5] मोहिता ॥　　१६

युग्मं कुण्डलयोर्ललौ ललितयोर्लीलामदो [6]दोलया
　　चापल्यान्मधुरं चकार [7]रशना रावं नितम्बस्थले ।
कामिन्याः करकङ्कणैर्निक्वणितं कामाहवस्योत्सवे
　　दृष्ट्वा कान्तपराजयं चरणयोर्लग्नौ चिरं नूपुरौ ॥　　१७

प्रणतिनिरतः कान्तः कस्मात् त्वयाद्य न वीक्षितः
　　प्रियसखि कुतो ऽप्यर्थाभावः किमेष सखीजनः ।
इयमपि गता[8] पूर्णप्राया पृथुर्हि निशीथिनी
　　कथय कठिने कीदृक् कोपस्तवैष हृदि स्थितः ॥　　१८

विसर्जय सुदुर्जनं गणय सज्जनं मानसे
　　कृतार्थय सखि प्रियं प्रकुरु तत्र मा विप्रियम् ।
रमस्व पतिसंगता विरम मानतः सांप्रतं
　　भजस्व मुदम[9]द्भुतां, कलुषतां द्रुतं संत्यज ॥　　१९

---

1 Ms °ताः. 2 Ms °स्ततस्त°. 3 Ms भूय. 4 Ms °नां. 5 Ms °नद्य. 6 Ms °लया. 7 Ms रसनां. 8 Ms गताः पुण्यप्राथाप्रथु°. 9 Ms °मुद्भू°.

P. P. Ac. Gunratnasuri M.S.　　Jin Gun Aaradhak Trust

आगम्याङ्गणभूमिकां कथमपि प्रायो वियोगातुरा
मार्गं वीक्ष्य विलोचनोत्पलगलल्लोलोदका प्रेयसी ।
नाद्याप्येष समागतः सखि पुनः [1]शून्यं कथं मन्दिरं
यास्यामीत्यभिधाय मोहमगमत् तावत् समेतः प्रियः ॥ २०

त्यज कठिनतामेतामाशु प्रयच्छ शुभां गिरं
सफलय ममाबन्धं मुग्धे विलोकनलीलया ।
चरणशरणं दासीभावं गतानुगृहाण माम्
अहह विषमो मानग्रन्थिस्तवाद्य मयीदृशः ॥ २१

करुणमनसा[2]प्युक्तं मुक्तं विलोचनजं जलं
शिरसि विधृतं भूयः पत्युश्चिरं चरणद्वयम् ।
सखि परिहृता व्रीडा क्रीडासखीषु मया मनाक्
तदपि हृदये नासीत् तस्य प्रियस्य दयोदयः ॥ २२

इयं परित्रस्तकुरङ्गलोचना
घनस्तनी चारुमुखेन्दुमण्डला ।
नितम्बिनी मत्तगजेन्द्रगामिनी
कृशोदरी मोहकरी च कामिनी ॥ २३

तवैष वक्त्रेन्दुरखण्डमण्डलः
तनोति कान्तिं नयनाभिरामकीम् ।
प्रिये कुचौ कुङ्कुमपङ्कपिञ्जरौ
सुवर्णपङ्केरुहकोरकाकृती ॥ २४

इति प्रिये भाषिणि पाणिजैर्मुहुः
स्तनाननं संस्पृशति प्रमोहिते ।
विलोक्य तां मन्मथकेलिलालसां
ययौ सहासोऽथ सखीं सखीजनः ॥ (युग्मम्) २५

1 Ms शून्ये कथं मन्दिरे. 2 Ms °मनया°.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

निर्गत्यावसथादहं सखि बहिस्तिष्ठामि यावत् क्षणाद्
आयातः [1]पुरतः कुतोऽपि ददृशे तावन्मया वल्लभः ।
मातः किं करवाणि पाणिकमले धृत्वा शठो मां हसन्
नीत्वा तत्र जगाम यत्र न जनो जानाति वै कश्चन ॥ २६

बालायाः शनकैर्विलासशयनादुत्थापयन्त्याः[2] पुनः
वस्त्रान्ते क्व नु यास्यसीति रभसादुत्का धृता या मया ।
सस्मेरं सकलं सलज्जपुलकं वक्रीकृतभ्रूलतं
यत् पीतं मुखमुन्नमय्य विदुषां नो तद्गिरां गोचरे ॥ २७

अङ्गेऽसङ्गिनि चन्दने न तु कियानेवावलेपो[3] धृतः
कण्ठे मौक्तिकगुण्ठितेन[4] गुणवान् हारोऽपि नारोपितः ।
संगृह्याञ्जनमञ्जिते न नयने रम्ये तया कान्तया
कान्तिं किं कथयामि तद्वपुषि यां कामोऽपि नो विन्दति ॥ २८

पान्थप्राणहरं प्रसूनविलसच्चूतद्रुमाणां वने
श्रुत्वा कोकिलया कृतं विरहिणी रावं निशीथे मुहुः ।
मूर्छामाप पुनर्विबुध्य मनसा पत्युः स्मरन्ती ततो
मुञ्चन्ती नयनाम्बुपूरमरुदत् पान्थप्रिया सस्वरम् ॥ २९

[ वसन्तान्तकालवर्णनम् ]

कर्णाटीकुच[5]कोटिकेलिविलसल्लीलालसाः[6] कोमलाः[7]
कासारप्रसरत्तरङ्गलतिषु क्रीडाकरा[8] मारुताः ।
मल्लीजालविलासलालनकला लोला वसन्तात्यये
वान्ति प्रातरनङ्गसज्वरपरस्त्रीखेदविच्छेदकाः ॥ ३०

[ ग्रीष्मकालवर्णनम् ]

धारायन्त्रतुषारसारकणिकानिर्वारितोष्मोदयं
श्रीखण्डागुरुधूपवासरुचिरं हर्म्यं सचन्द्रोदयम् ।
शय्या पुष्पमयी च चन्दनरसः कर्पूरकस्तूरिका[9]
वासः स्वच्छमकञ्चुका प्रियतमा ग्रीष्मे सुखस्यास्पदम् ॥ ३१

1 Ms पुरुतः. 2 Ms °न्त्या. 3 Ms °वाविलेपा°. 4 Ms °तोन°. 5 Ms °कुट°. 6 Ms °लसा. 7 Ms °मला. 8 Ms °कराः. 6 Ms °कस्तुरिका.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

इदं नु किमु नीरजं, भवति तद्धि पङ्केरुहं
किमेष रजनीकरो, ननु स लाञ्छनेनाङ्कितः ।
अथेति मधुराधरं चलविलोचनं सस्मितं
विभाव्य दयितामुखं हृदि दधे मुदं वल्लभः ॥ ३२

मन्दं मन्दं निभृतचरणं [1]पृष्ठतोऽभ्येत्य[2] तस्याः
स्निग्धः सायं करतलयुगेनाक्षिणी मीलयित्वा[3] ।
चुम्बत्येवं विपुलपुलकं गल्लयोरुल्लसन्त्याः
वक्त्रं कामादधरमधुरं प्राणनाथः प्रियायाः ॥ ३३

सुतनु मनसि मानं माऽऽनयानङ्गकेलौ
[4]दयिततममपि स्वं मानयालिङ्गनाद्यैः ।
इति निगदितपत्यौ मानतो नालपन्ती
कठिनकुचतटे सा नेत्रनीरं मुमोच ॥ ३४

आशेयं सखि मे रुणद्धि हृदयं कान्तागमस्यानिशं
धार्यन्तेऽपि मया कथंचिदसवस्तत्संगमाकाङ्क्षया ।
जल्पन्ती पथिकाङ्गनेति सहसा श्रुत्वा स्वरं प्रेयसः
सव्रीडा समुदेव साश्रुनयना सा सस्वरा [5]सस्मरा ॥ ३५

मत्तद्विरदभूपाललीलागतिरसालसा ।
आयाति बाला लोलाक्षी मदालिङ्गनलालसा ॥ ३६
अनङ्गसरसैरङ्गैः सङ्गं संगम्य कान्तया ।
तनोमि रतपाण्डित्यं [6]विलीना निलये सखि ॥ ३७

भूयोभिर्दिवसैरयं प्रियतमो देशान्तरादागतो
विद्वानप्युचितं तनोति जडतामालापमग्नो जनः ।
इत्यालोच्य विलासलोलनयना कामाकुला कामिनी
कान्ते चैव सखीजने निशि तनौ दीपे दृशं संदधे ॥ ३८

---

1 Ms प्र. 2 Ms °भेत्य. 3 Ms मिलयित्वा. 4 Ms दयत तमसि मं स्वं.
5 Ms सस्मराः. 6 Ms विलीनिलये.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

गच्छामीति समुत्थितो निवसतेः कान्तः समालम्बितो[1]
विश्रब्धं परिरब्ध एव हि मया यातस्ततो निर्घृणः ।
यावन्मातरहं विलासशयने सुप्तास्मि चिन्तातुरा
तावत् तेन शनैः समेत्य हसता वक्त्रे चिरं चुम्बिता ॥ ३९

स्निग्धं मुग्धे रचय नयनं विभ्रमालोकदक्षं
वक्त्रे वाणीं रचय सरले कोमलालापरम्याम् ।
अङ्गं रङ्गत्सुललितमथो भावय प्राणनाथे
भूयो भूयो भव तदनुगा त्वं मिथः संकथासु ॥ ४०

कीदृक् कोपो मनसि वसति प्रेमहारी तवायं
पत्यौ नम्रे विरमति न यश्चाटुवाचां विधिज्ञे ।
एभिः कृत्यै[2]रसुजनजनं पूर्णकामं कृथा मा
हर्षोत्कर्षं गमय सुजनं, तं पतिं स्वीकुरुष्व ॥ ४१

गङ्गेयं हरिणाक्षि हारलतिकाक्रान्तस्तनोच्चैस्तटा
कालिन्दी किल कोमला विलसति त्वन्नील[3]रोमावली ।
वक्रोक्त्या च सरस्वती सुललिता सङ्गश्च मध्ये मिथः
एतास्तीर्थमुपागतास्त्वयि परं सेव्या त्वमेवासि मे ॥ ४२

वक्षोजाचलयातिनी च विमला मुक्तालता जाह्नवी
रोमाली ललिता कलिन्दतनया प्रोर्ध्वं प्रयातेव ते ।
मध्ये संगतयोस्तव प्रियतमे सौम्यं तयोः संगमं
संप्राप्तं मनसोऽभिलाषमखिलं सेवे सकामो ह्यहम् ॥ ४३

मातर्मे न परा शरीरपटिमा वक्रा मम भ्रूलता
चेतो भीतिपरायणं मम चले स्थाने न मे लोचने ।
निर्यातौ हृदि गोलकावतितरां गुर्वी नितम्बस्थली
मध्यं क्वापि गतं ममापि चरणौ मन्दां गतिं संश्रितौ ॥ ४४

धैर्यं धेहि निरंतरं स्वहृदये बाले भयं मा कृथाः[4]
स्त्रीणामीदृगपाटवं किल वयःसंधौ समुत्पद्यते ।
तन्त्रज्ञो गदलक्षलक्षणविधौ दक्षो निदाने तथा
वैद्यस्ते दयितः कलासु कुशलस्तस्मै तनुं दर्शय ॥ युग्मम् ४५

---

1 Ms लिंब°. 2 Ms °रस°. 3 Ms °न्मील. 4 Ms °था.

P. P. Ac. Gunratnasuri M.S.                    Jin Gun Aaradhak Trust

[ ग्रीष्मान्तकालवर्णनम् ]

वर्द्धि प्रोषितभर्तृकाहृदि भृशं मन्दोऽपि संदीपयन्
अङ्गग्लानिमनङ्गरङ्गजनिता संभोगिनीनां हरन् ।
सुस्पर्शश्च वने नयन् परिणतिं जम्बूतरूणां फलं
व्यूढप्रौढकदम्बपुष्पसुरभिर्ग्रीष्मान्तवातो ववौ ॥ ४६

[ वर्षाकालवर्णनम् ]

पान्थानुत्कलिकाकुलानतितरामुत्साहयन् पद्धतौ
कान्तासंगमरागिणां धृतिमतामङ्गे स्मरं जीवयन् ।
[1]जातीकोरकजालमाशु दलयन्नावाति वर्षागमे
मेघोन्मुक्तपृषत्सुसिक्तवसुधागन्धं वहन् मारुतः ॥ ४७

धन्यः कोऽपि [2]पुमानलं जलधरे धीरं मृदङ्गोपमं
ध्वानं कुर्वति गर्वितालिनिवहे गानं परं गायति ।
वध्वा सार्धमगारजालमतुलं संश्रित्य कामालसः
सानन्दं तडिदङ्गनागणकृतं नृत्यं [3]समुद्वीक्षते ॥ ४८

तत्रैव त्वरितं व्रजेति स मम प्राणाधिनाथो यतः
त्यक्तं जीवितमेतया प्रियमपि प्रायो वियोगे तव ।
त्रैलोक्ये त्वति[4]रूपमीदृशमिदं भूयोऽपि नो लभ्यते
प्राणास्तां न परित्यजन्ति सुभग [5]त्वद्ध्यानलग्ना अपि ॥ ४९

[6]पतद्भच्छन्निरालम्बान्[7] रक्षाम्नार्तिनः समम् ।
निवेद्य[8]मद्य वो भर्तुः प्राणनाथमिहानय ॥ ५०

नीरं नीरधरानीकेऽनेकधारं निरस्यति ।
निजनाथानता नारी नेत्रनीरजनिर्गतम् ॥ ५१

दोलत्कुण्डलचञ्चलांशुललितैरालोकिताशामुखः
कुर्वन् कङ्कणमेखलाकलकलव्याजेन [9]धीरध्वनिम् ।
घर्मान्ते जलबिन्दुसुन्दरतरस्तापापनोदाय मे
शक्तोऽयं सुपयोधरस्तव घनश्चेतःप्रमोदं नयेत् ॥ ५२

1 Ms जाता°. 2 Ms मुमानलं. 3 Ms °द्वीक्ष्यते. 4 Ms त्विवति. 5 Ms सुभगन्वध्यान. 6 Ms पतं नू. 7 Ms °लम्ब. 8 Ms °माधवो. 9 Ms धीरद्ध्वनिम्.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

उत्तुङ्गावति[1]पीवरावतितरां पीनौ सुतीक्ष्णाननौ
　　वक्षोजन्म[2]शिलोच्चयौ सखि परं कान्तः कृशाङ्गो मम।
कुर्यां यद्युपरि प्रयाति मरुता नेत्थंतनो विद्यते[3]
　　तस्यैव प्रतिपालनप्रवणया रात्रिर्मया नीयते ॥ ५३

पीत्वा ममाधररसं दयितो नितान्तं
　　तृष्णातुरो मनसि यत् प्रमदं प्रपेदे।
मत्तः स तेन सखि मां परिरभ्य वश्यां
　　मुक्तांशुकां तदुचितं च समाचचार ॥ ५४

इयं [4]जलदमण्डली [5]मलिनतां नभः प्रापयेद्
　　गृहेऽतिमदनातुरा प्रथमयौवना कामिनी।
अहं तु पथि [6]निष्ठितः कुसुमबाणबाणार्दितः
　　परं विरहनिर्घृणः[7] कथमहो विधाता विधिः ॥ ५५

[ शरत्कालवर्णनम् ]

सुस्पर्शाः [8]शालिगोपीविकटकुचतटाभोगयोगाभिरामाः
　　प्रोन्मीलत्सप्तपर्णप्रसवपरिमलप्राप्तसौभाग्यभोग्याः।
केदारोदारिवारिप्रसृमरकुमुदान्दोलन[9]प्रौढलीलाः
　　पान्थस्त्रीणामनिष्टाः प्रियरतसुखदाः शारदा वान्ति वाताः॥ ५६

त्वद्वक्त्रशारदनिशाकर[10] एष कान्ते
　　कान्तांशुजृम्भितविलोचनकैरवोऽपि।
[11]उन्माद्य मामतनु मोहयते निकामं
　　कुर्यादतो मम मनो मदनाधिरूढम् ॥ ५७

निःश्वासा[12]नामधरमधुरत्वं च धत्से कपोले
　　संमृज्यन्ते रुचिररचनाः पाणिना यत्र वल्ल्यः।
पत्युर्वाक्यं श्रुतमपि न ते त्वन्मनस्ताप[13]हर्तुर्-
　　जातावेतौ सजडहृदये मन्युमानौ प्रिये तौ ॥ ५८

---

1 Ms °उत्तंगावती°. 2 Ms °लिलो°. 3 Ms °ध्यते. 4 Ms जलमण्डली. 5 Ms °लिनितां. 6 Ms °धि. 7 Ms °निघृ°. 8 Ms शाली°. 9 Ms °लनाप्रौ° 10 Ms °निशाक प°. 11 Ms उन्मां मां तनु. 12 Ms °नम°. 13 Ms °हाता.

P. P. Ac. Gunratnasuri M.S.　　Jin Gun Aaradhak Trust

परिमलमिलितालिर्मालतीपुष्पमाला
सुरभिघुसृणमिश्रं चन्दनालेपनं च ।
तुहिनकिरणरश्मिश्रृङ्खला चापि दोला
शरदि सुखविभूत्यै कामिनी कामलोला ॥ ५९

आदौ बभूव कलहः प्रणयेन कश्चित्
कालः पराङ्मुखतया शयने प्रयातः ।
पत्युर्मुखं सखि मयैक्षि पुनर्विचिन्त्य
तेनातिमात्रमधरेऽहमिय[1] गृहीता[2] ॥ ६०

कोदण्डीयति मार्गणीयति [3]लसल्लोलं कृपाणीयति
प्रत्यञ्चीयति चेषुधायति तथा सोल्लास[4]पाशीयति ।
भ्रूवल्ली नयनं च वेणिचटुला हारावली नासिका
कामिन्याः[5] पुरुषेषु सुन्दरतरं तत्कर्णपालीयुगम् ॥ ६१

वक्त्रेन्दुश्छत्र[6]मीषत्स्मितमपि कुसुम भ्रूलता चापमासीद्
नेत्रद्वन्द्वं शरौघाः श्रवणपरिलसत्कुण्डले दीपमाला ।
वक्षोजौ हेमकुम्भौ जघनपरिसरे भीरु सिंहासने ते
बाल्यं जित्वातिचक्रे वपुषि हृदिभुवा यौवनस्याभिषेकः ॥ ६२

ह्रिया विनमितानना मदविलोकलोलेक्षणा
[7]निगूढविहितस्मिता सपुलका नवोढा वधूः ।
सखीजनमनीदृशं किमपि भावमाबिभ्रती[8]
चकार मदनातुरं रजनिवृत्तसंपृच्छकम् ॥ ६३

दधत् कान्तिं रम्यामलकविगलन्माल्यमलसं
स्मरक्रीडाजन्यश्रमजलपृषन्मिश्र[9]तिलकम् ।
रतान्ते संमीलन्नयनकमलं चारु दयितः
पपौ कान्तावक्त्रं सुचिरमिति तृष्णातरलितः ॥ ६४

1 Ms °हमीय°. 2 Ms गृहीताः. 3 Ms °सल्लोल. 4 Ms ° पासी °. 5 Ms °न्यात्पु°. 6 Ms °मिष°. 7 Ms निगूह°. 8 Ms °बीभ्रती. 9 Ms °श्रि°.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कान्ते, वल्लभ, यामि, याहि, भवतो मार्गे शिवं[1] वर्तताम्
आयाहि त्वरितो गृहं पुनरपि त्वं पान्थ देशान्तरात् ।
अस्माकं भवितव्यतेति विहितेत्युक्त्वा सनिःश्वासया
रुद्धो लोचनवारिहारिकुचया प्राणेश्वरः[2] प्रस्थितः ॥ ६५

अहो स्नेहमहो रूपमहो कान्तिमहो रतिम्[3] ।
अहो लीलामहो वाणीं कदा तस्या लभेमहि ॥ ६६

[4]अपूर्वः कोऽपि रूपस्य योषितां महिमा महान् ।
मोह्यन्ते योगिनो येन नेत्रगोचरवर्तिना ॥ ६७

लावण्यसलिलापूरा विलासलहरीयुता ।
चललोचनमीनेयं[5] बाला कामतरङ्गिणी ॥ ६८

चरणपतितां [6]सलग्नाङ्गीं भवत्यनुरागिणीं
गतघृण कथं मुग्धामेतां भवानवमन्यते[7] ।
इति [8]निगदितरतत्सख्या तु प्रियः प्रणयान्वितो
विविधकरणै[9]र्मानं मुक्त्वा प्रियां समरञ्जयत् ॥ ६९

रथो वामाक्षीयं चपलनयने यस्य तुरगौ
कशा वेणीरश्मिः सरलतरला[10] हारलतिका ।
नितम्बो यच्चक्रं कुचयुगवरूथो हरति मे
[11]समारूढ[12]श्चेतः कुसुमविशिखः सारथिरसौ ॥ ७०

विलासावासान्तः कितवचरितेन प्रणयिना
सुखेनासीनायाः सुसखि शयने सायकमये ।
कराक्रान्तौ कृत्वा कथमपि कुचौ मेऽतिकठिनौ
हठेनाश्लिष्टायाः परिशिथिलतां नीविरभजत् ॥ ७१

---

1 Ms शवं. 2 Ms प्राणेश्वरं. 3 Ms °ति. 4 Ms अपूर्व. 5 Ms °मिनेयं. 6 Ms सलग्ना°. 7 Ms °से. 8 Ms निगदितं. 9 Ms °करुणै°. 10 Ms °लतला. 11 Ms °तदा°. 12 Ms °ढो.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

[ हेमन्तकालवर्णनम् ]

कन्दर्पादेशजाग्रद्विविधसुरतवित्कान्तदन्तक्षतोष्ठ[1]-
[2]व्यावल्गत्कान्तिराजत्सु[3]ललितललनासीत्कृतापीतवेगाः[4] ।
हेमन्ते वान्ति वाता विरहितवनितावक्त्रसोष्माभिनिर्यन्[5]-
निःश्वासा वारिधाराधरणवहुलतामुष्णतामुद्वहन्तः ॥ ७२

प्रौढा पीनपयोधरोरुकलशा[6] माञ्जिष्ठरागांशुका
सौम्या वृत्तनितम्बचक्रचतुरा पर्यङ्कभूमिस्थिता ।
अन्तः[7]संभृतभासुरस्मरवृहद्भानुर्मनोहारिणी
हेमन्ते हिमहारिणी सुखरता नृणां हसन्ती प्रिया ॥ ७३

शीततुंभीतस्तव संगमेन मनःस्थितेनैव न सान्त्वयामि[8] ।
कदावयोरेव विधिर्विधाता शय्यासने सन्नतगात्रयोगम् ॥ ७४

ऊरुभ्यां गाढमूरू मदनमदभवद्वाष्प[9]भावोत्तराभ्यां
पीनोत्तुङ्ग[10]स्तनेन [11]प्रमुदितवदना वक्षसालिङ्ग्य वक्षः ।
सोत्कण्ठं कण्ठदेशे निजभुजलतया लीलयारुह्य दोलां
हेमन्ततौं[12]स्वभर्तुर्निशि च सुकृतिनी कापि शेते गृहान्तः॥ ७५

मुग्धां नाथ वृथा प्रतारयसि रे किं मां वृथा भाषसे
[13]नैषास्मीति मया विना भव सखीमान्यो जनो मान्यताम् ।
मामेवं [14]वद दुर्वचः पिशुनया कान्ते कया पाठिता
वर्तन्ते त्वयि [15]संतत प्रियतमे प्राणा इमे मामकाः ॥ ७६

शय्यायां शयिता समीक्ष्य दयितां वाष्पाम्बुपूर्णेक्षणां
पप्रच्छागतसाध्वसः कुत इदं कान्तस्तदालीजनम् ।
अन्यस्त्रीगमनात् तवेति कथिते तासां प्रतीत्यै पुरः[16]
संस्पर्श्येत [17]मुहुर्मुहुः प्रियतमावक्षोजलिङ्गद्वयम् ॥ ७७

---

1 Ms °क्षितोष्ठ°. 2 Ms °वलत्का°. 3 Ms °राजसु°. 4 Ms °वेगा°. 5 Ms °भिर्नि°. 6 Ms °कलिशा. 7 Ms °संभूत°. 8 Ms शांतयामि. 9 Ms °वतबा°. 10 Ms °त्तङ्ग. 11 Ms °न मुदित°. 12 Ms हेमन्ततौं. 13 Ms नैषास्मिती. 14 Ms चद. 15 Ms संतत. 16 Ms पुरूः 17 Ms मुहुर्मुहु.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अचिन्त्यापि स्नेहं करकलितमाक्षिप्य वसनं
प्रयाते हृन्नाथे सविनयमनादृत्य वचनम् ।
ततः [1]सख्याऽलक्ष्य प्रियतममथोच्चैःस्वरमहो
पटान्तेनावृत्य स्वमुखमनया तत्र रुदितम् ॥ ७८

इन्दुः सुन्दरि मन्दरश्मिरधुना जातो विभाता[2] निशा
कान्तानां कटुरारटीति विकटः कान्ते पटुः [3]कुक्कुटः ।
हीनस्नेहरसेन रुक्षदशया दीपोऽपि मन्दायते
मानं मानिनि मुञ्च वल्लभमिमं कामोत्सवै [4]रञ्जय ॥ ७९

घ्राणेनामृदुना [5]दुनोति मदनो मन्दोऽपि मां त्वत्कृते
दीनेऽस्मिन् नववल्लभे कुरु दयामिन्दीवराक्षि प्रिये ।
अङ्गैः संगमरङ्गभङ्गिचतुरैरानन्दितालिजनैः सु-
तल्पोत्सङ्गविकल्पजल्पनपरं मानेन चालिङ्ग्य ॥ ८०

त्वां नता स्मर कृताञ्जलिरेषा मा विमानय मनोरम काम ।
आगते तु दयिते भवदाज्ञां धारयामि सरसा शिरसाऽहम् ॥ ८१

दुकूले प्रतिकूलं मे [6]हारो हा रोचते न मे ।
मेखला मे खला जाता [7]हंसकं हिंसकं सखी ॥ ८२
मुक्ता [8]मुक्तालता कण्ठे कान्ते कान्ते समागते ।
अञ्जनेनाञ्जिते[9] सख्या नेत्रे नेत्रधृतिः [10]कृता ॥ ८३

मुक्ता मुक्तालतेयं कुचकलशरुचा कण्ठदेशे सुदेशे
वासो वासोचितं स्वं परिहितमनया चारु बिम्बे नितम्बे ।
नक्तं भुक्तं विभुक्तं विपुलनयनयोञ्जनं रञ्जनं वै
भर्ता धर्ता विहर्ता सुरतविलसितै रञ्जितोऽ[11]रं जितश्च ॥ ८४

बद्ध्वा दृढं [12]रशनया प्रणयप्रकोपा
नीत्वा निवासभवनं[13] विहितागसं माम् ।
कान्ता विलोचनजलप्लुतचक्रचन्द्रा
कर्णोत्पलेन सविलासमसौ जघान ॥ ८५

1 Ms सक्ष्यालक्ष. 2 Ms विभातो. 3 Ms कुर्क्कटः. 4 Ms रञ्जयः. 5 Ms हुतोनिमृदुनो. 6 Ms राहो. 7 Ms हंसकिं. 8 Ms मुक्त°. 9 Ms °ने नोजने. 10 Ms कृताः. 11 Ms °तोरं°. 12 Ms रसनया. 13 Ms °भुवनं.

P. P. Ac. Gunratnasuri M.S.  Jin Gun Aaradhak Trust

आलिङ्गितानि नवपल्लवकोमलानि
बाला बलादपि [1]मयातिमनोहराणि ।
अङ्गान्यनङ्गललितानि किमात्मनैव
संकोचयत्यनिभृतानि मदालसानि ॥ ८६

[ शिशिरकालवर्णनम् ]

किञ्चिद् द्रुमान् मुकुरयँस्तरसा रसालान्
हेमन्त[2]कान्तमदनं मदयन् जनेषु ।
[3]लीलायितेन मलयाचलमल्लमालाद्
आयाति मारुत इतः किल [4]शैशिरोऽयम् ॥ ८७

एतस्मिन् [5]शिशिरे विधौ विमुखिते यासां प्रियः प्रोषितः
पत्युः संगमसंभवं सुखमहो यासां च नो जायते ।
मानिन्यो धृतभूरिमानविभवास्तोषं न या लेभिरे
तासां किं न मनोभवः सखि मनः [6]सीमन्तिनीनां दहेत् ॥ ८८

[ वसन्तसमागमः ]

प्रियतम न ते युक्तं गन्तुं वसन्तसमागमे
मुकुरिततरावङ्कस्थां मां विहाय मनोगताम् ।
कलकलरवान् रात्रौ कृत्वा सकोकिलया [7]रुतान्
भवति चलिते संप्रत्येषा न जीवितुमुत्सहे ॥ ८९

वासावासविलासवासित[8]मतिः प्रेमप्रसन्नां प्रियाम्
आलिङ्गन् दयितो दृढोष्मलकुचां शीतं च नो [9]विन्दते ।
चेतःसंपरिवर्तमानदयितासंदीप्यमानोल्लसत्[10]-
[11]संसर्पद्विरहाग्नितापितवपुः पान्थोऽपि नो जग्मिवान् ॥ ९०

प्राणेश्वरे समायाते प्राणा मे पुनरागताः[12] ।
सखीदं कौतुकं पश्य मृताहं जीविता पुनः ॥ ९१

निर्याते दयिते गृहादपि सखि प्राणैर्गता पृष्ठतः
[13]प्राग्ग्रामे पुनरागतास्मि [14]भवनं कुर्वेऽस्य सेवां ततः ।
स्वप्नेषु प्रतिरात्रिजातसुरतैश्चेतोविमोहात्मकै-
स्तत्रापि [15]प्रणयातिरेकललितैः[16] प्राणेश्वरो रञ्जितः ॥ ९२

---

1 Ms °यानि. 2 Ms °मंत°. 3 Ms °यते°. 4 Ms शिशरो°. 5 Ms शशिरे. 6 Ms. °मंतनी°. 7 Ms कृतान्. 8 Ms. °वासितः°. 9 Ms विंदत. 10 Ms °लसत्. 11 Ms संसर्प्य. 12 Ms °गता. 13 Ms प्राग्रामे. 14 Ms भुवनं. 15 Ms °यति°. 16 Ms °तै°.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तन्वीयं तरलेक्षणा मम मनः पञ्चेषुणा हन्यते
वक्षोजावियमुन्नतौ[1] प्रवहते खिन्नं ममेदं मनः ।
मध्येऽसौ सुकृशा [2]ममाद्दमतिप्राप्नोति भङ्गं मनो
लावण्याम्बुपरिप्लुतेयमचला शून्यं मदीयं मनः ॥ ९३

[3]यत्रादौ कलमेखलाकलकलः प्रादुर्बभूवातुल-
स्तत्रैवाथ[4] तदेव नूपुररणत्कारस्ततः शुश्रुवे ।
तन्मन्ये पुरुषायितं प्रमदया वामायितं कामिना
पश्चाच्चित्ररतावसानसमये ताभ्यां स्वभावे स्थितम् ॥ ९४

आनन्दं हृदि धेहि कङ्कणमथो [5]संधेहि पाणिद्वये
[6]सद्रत्नः परिधेहि हारमुरसि त्वं पादयोर्नूपुरम् ।
सामोदानि निधेहि मूर्ध्नि कुसुमान्यक्ष्णोश्च [7]कालाञ्जनं
मुग्धे साधु विधेहि मङ्गलमथायाते निजप्रेयसि ॥ ९५

समागतः पूर्णमनोरथासि तवैव कान्तः परिपूर्णकामः ।
आगच्छ बाले कुरु मङ्गलानि गौरी प्रसन्नैव तवाद्य नूनम् ॥ ९६

सानन्दा भव सादरा भव भव प्रीता सकामा भव
साहारा भव भूषिता भव भव [8]प्राणेश्वरे [9]प्रेयसी ।
आयातेन रमस्व वासभवने [10]बाह्याच्च देशान्तराद्
नानामोहनपण्डितेन सहिता कान्तेन कामोत्सवैः ॥ ९७

चिन्तां मुञ्च, भजस्व [11]मानिनि धृतिं, मोहे मनो मा कृथाः
[12]द्वित्रैरेव हि [13]वासरैः [14]प्रियतमप्रत्यागमस्यावधिः ।
इत्येवं प्रतिबोधयेत् प्रियसखी यावत् प्रियां सादरं
तावत् [15]कान्त उपागतोऽङ्गभुवि[16] प्रीणाति वाक्यामृतैः ॥ ९८

आरूढोऽतिसमुन्नतस्तनमयं सिंहासनं योषितां
तद्वक्त्रेन्दुधृतातपत्ररुचिरस्तद्भ्रूलताकार्मुकः ।
तद्वेणीविलसत्कृपाणफलकः शृङ्गारिणां पूजित-
स्तल्लोलेक्षणमार्गणो विजयते श्रीनन्दनः श्रीमताम् ॥ ९९

---

1 Ms. मन्न तौ. 2 Ms मम°. 3 Ms यात्रादोकल°. 4 Ms °वाप्य. 5 Ms सेवेद्धि. 6 Ms °द्रासा. 7 Ms कालीजनं. 8 Ms प्राणेश्वर. 9 Ms प्रेयसि 10 Ms बाह्येव. 11 Ms मानिनी. 12 Ms द्वित्रि°. 13 Ms. वासरेः 14 Ms प्रियतमः. 15 Ms कान्तमुपा°. 16 Ms भूवि.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सौजन्ये निरताः खलेषु विरता [1]विद्वद्गुणग्राहिणो
लोके विश्रुतकीर्तयो गुणभृतो ये केऽपि शृङ्गारिणः ।
विश्राणा करिकुम्भतुङ्गकठिनौ[2] पीनावुरोजौ सदा
तेषां वामविलोचना गुणवती भोगाय भूयाद् भुवि ॥ १००

उन्मीलन्मतियन्त्रसूक्ष्मविवरां[3] सानन्दमुत्कर्पितां[4]
प्राप्योच्चैर्विलसत्सुवर्णगुणिनीं खेलन्मनोभूमणिम् ।
[5]श्री हर्षः [6]सुहृदां विभूषणकृते सद्वाक्यमुक्ताफलै-
[7]रग्रथ्नाद् द्विजराजरोचिरमलां शृङ्गारहारावलीम् ॥ १०१

इति श्रीहर्षविरचिता शृङ्गारहारावली समाप्ता[8] ।

★

---

1 Ms विद्वद्गुणा ग्राहिणी. 2 Ms °कठिना. 3 Ms सूक्ष्म्य विवरा. 4 Ms °तः. 5 Ms श्रीहर्ष. 6 Ms सुहृदं. 7 Ms यद्ग्रन्थद्विजं°. 8 Ms प्ताः.

सं. १७३३ आषाढ वदि ८ शुक्रे लिखितं द्विवेदिविद्याधरसुतलक्ष्मीधरेण ॥

( पुष्पिकानन्तरं श्लोकद्वयीयमधिका समुपलभ्यते )

पूर्णाम्भःकुम्भभाराः प्रजवनचलिताश्चुञ्चुकं[1] चालयन्त्य-
श्चीलं संवेलयन्त्यश्चलकमलदृशो लोकमालोकयन्त्यः ।
झंकारैर्झझराणां झटिति जनमनःखेदमुत्पादयन्त्यो
नागर्य्यः स्वर्णगौर्यो वडनगरभवा यान्ति गेहं सरस्तः ॥ १

भो पान्थ[2] भ्रान्तचेताः[3] परिभ्रमसि कथं नैव दृष्टा कदाचिद्
वत्सोवाली मृगाक्षी जगति सुविदिता रूपराशिं दधाना ।
यस्याः सौन्दर्यराशिं विधिरतिचतुरां वीक्ष्य चक्रे घृताचीं
यद्रूपं द्रष्टुमिन्द्रो मखशतसुकृतैर्दैकसहस्रं दधार ॥

---

1 Ms चञ्चुकं. 2 Ms पान्थः. 3 Ms चेता.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# श्लोकपङ्क्ति-अनुक्रमणिका

[ Figures indicate the numbers of verses. ]


| | | | |
|---|---|---|---|
| अग्रथ्नाद् द्विजराजरोचि | १०१ | आलिङ्गन् दयितो | ९० |
| अङ्गग्लानिमनङ्गरङ्ग | ४६ | आलिङ्गितानि नवपल्लव | ८६ |
| अङ्गान्यनङ्गललितानि | ८६ | आलिङ्ग्य मां किमपि | ११ |
| अङ्गे संगिनि | २८ | आवाति मारुत इतः | ८७ |
| अङ्गैः संगमरङ्गभङ्गि | ८० | आश्चर्यं सखि मे | ३५ |
| अङ्गं रङ्गत्सुललितमथो | ४० | आश्लिष्यत् कुचचक्र | ५ |
| अचिन्त्यापि स्नेहं | ७८ | इति निगदितपत्यौ | ३४ |
| अञ्जनेनाञ्जिते | ८३ | इति निगदितस्तत्सख्या | ६९ |
| अथेति मधुराधरं | ३२ | इत्थं सा सुभग | ४ |
| अथाहमालि तल्पिने | ११ | इत्यालोच्य विलास | ३८ |
| अनङ्गसरसैरङ्गैः | ३७ | इत्येवं प्रतिबोधयेत् | ९८ |
| अन्तर्बाष्पनिरुद्ध | ८ | इति प्रिये भाषिणि | २५ |
| अन्तःसंभृतभासुर | ७३ | इदं नु किमु नीरजं | ३२ |
| अन्यस्त्रीगमनात् तवेति | ७७ | इन्दुः सुन्दरि मन्दरश्मि | ७९ |
| अपूर्वं कोऽपि रूपस्य | ६७ | इयमपि गता पूर्णप्राया | १८ |
| अस्माकं भवितव्यतेति | ६५ | इयं जलदमण्डली | ५५ |
| अहह विषमो मानग्रन्थि | २१ | इयं परित्रस्तकुरङ्ग | २३ |
| अहो लीलामहो वाणीं | ६६ | उत्तुङ्गावतिपीवरा | ५३ |
| अहो स्नेहमहो रूपमहो | ६६ | उन्माद्य मामतनु | ५७ |
| अहं तु पथि निष्ठितः | ५५ | उन्मीलन्मतियन्त्रसूक्ष्म | १०१ |
| आक्रान्तहृदयेनाहं | १६ | ऊरूभ्यां गाढमूरू | ५५ |
| आगच्छ बाले कुरु | ९६ | एतस्मिन् शिशिरे | ८८ |
| आगते तु दयिते | ८१ | एतस्मिन् समये | १४ |
| आगम्याङ्गणभूमिकां | २० | एतास्तीर्थमुपागता | ४२ |
| आदौ बभूव कलहः | ६० | एभिः कृत्यैरसुजन | ४१ |
| आधूय चन्दनवनी | ३ | कठिनकुचतटे | ३४ |
| आनन्दं हृदि धेहि | ९५ | कण्ठे मौक्तिकगुण्ठितेन | २८ |
| आयाति बाला लोलाक्षी | ३६ | कर्णाटीकुचकोटि | ३० |
| आयातेन रमस्व | ९७ | कर्णोत्पलेन सविलास | ८५ |
| आयातः पुरतः कुतोऽपि | २६ | कथय कठिने कीदृक् | १८ |
| आयाहि त्वरितो गृहं | ६५ | कदावयोरेव विधि | ७४ |
| आरूढोऽतिसमुन्नत | ९९ | कन्दर्पादेशजाग्रद्विविध | ७२ |

कराक्रान्तौ कृत्वा ७१
करुणमनसाप्युक्तं मुक्तं २२
कलकलरवान् रात्रौ ८९
कशा वेणीरश्मिः ७०
कान्ताकान्तकपोल १
कान्ता किं कुरुते ९
कान्तानां कटुराररटीति ७९
कान्ताविलोचन ८५
कान्तांशुजृम्भित ५७
कान्तासंगमरागिणां ४७
कान्ति किं कथयामि २८
कान्ते कामतरलेन ११
कान्ते चैव सखीजने ३८
कान्ते त्वन्मुखचन्द्रमा ५
कान्तेनाद्य समागतेन १४
कान्ते वल्लभ यामि ६५
कान्तो मन्मयता १४
कामिन्याः करकङ्कणै १७
कामिन्याः पुरुषेषु ६१
कामः कौसुमकार्मुकं १
कालिन्दी कील ४२
कालः पराङ्मुखतया ६०
कासारप्रसरत्तरङ्गततिषु ३०
किञ्चिद् द्रुमान् ८७
किमेष रजनीकरो ३२
कीदृक कोपो मनसि ४१
कुञ्चत्कोकनदश्रियो ८
कुर्यादतो मम ५७
कुर्या यद्युपरि प्रयाति ५३
कुर्वन् कङ्कणमेखला ५२
कृतार्थय सखि प्रियं १९
कृशोदरी मोहकरी २३
केदारोदारिवारि ५६
कोदण्डीयति मार्गणीयति ६१
कः शाखी सखि ४
मङ्क्ष्वियं हरिणाक्षि ४२
गच्छामीति समुत्थितो ३९
गतघृण कथं मुग्धामेतां ६९
गृहेऽतिमदनातुरा ५५
ग्लानिं हरन् सुरतजां ३
घनस्तनी चारुमुखे २३
घर्मान्ते जलबिन्दु ५२
चकार मदनातुरं ६३
चरणपतितां संलग्नाङ्गीं ६९
चरणशरणं दासीभावं २१
चललोचनमीनेयं ६८
चापल्यान्मधुरं चकार १७
चिन्तां मुञ्च भजस्व ९८
चीलं संवेलयन्त्य (Footnote p. 16) १
चुम्बत्येवं विपुलपुलकं ३३
चेतो भीतिपरायणं ४४
चेतः संपरिवर्तमान ९०
छिन्ने तत्र चिराग्नि ४
जल्पन्ती पथिकाङ्गनेति ३५
जातावेतौ सजडहृदये ५८
जातीकोरकजालमाशु ४७
झंकारैर्झंकाराणां (Footnote p. 16) १
ततः सख्याऽलक्ष्य ७८
तत्रापि प्रणयाति ९२
तत्रैव त्वरितं ४९
तत्रैवाथ तदेव नूपुर ९४
तदपि हृदये नासीत् २२
तद्योग्यं तदहं चकार १५
तद्वक्त्रेन्दुधृतातपत्र ९९
तद्वेणीविलसत्कृपाणफलकः ९९
तनोति कान्ति २४
तनोमि रतपाण्डित्यं ३७
तन्त्रज्ञो गदलक्ष ४५
तन्मन्ये पुरुषायितं ९४
तन्वी न कस्य १०
तन्वीयं तरलेक्षणा ९३
तमारूढश्चेतः ७०

| | | | |
|---|---|---|---|
| तत्रैष वक्त्रेन्दुरखण्ड | २४ | निजनाथानता नारी | ५१ |
| तल्पोत्सङ्गविकल्प | ८० | नितम्बिनी मत्तगजेन्द्र | २३ |
| तल्लोलेक्षणमार्गणो | ९९ | नितम्बो यच्चक्रं | ७० |
| तस्यैव प्रतिपालन | ५३ | निर्याते दयिते | ९२ |
| तावत् तेन शनैः | ३९ | निर्यातौ हृदि गोलका | ४४ |
| तासां किं न मनोभवः | ८८ | निवेद्यमद्य वो भर्तुः | ५० |
| तुङ्गायेत मदेन | ५ | निश्वासानामधर | ५८ |
| तुहिनकिरणरश्मि | ५९ | निःश्वासा वारिधारा | ७२ |
| तृष्णातुरो मनसि | ५४ | नीत्वा तत्र जगाम | २६ |
| तेनातिमात्रमधरे | ६० | नीत्वा निवासभवनं | ८५ |
| तेषां वामविलोचना | १०० | नीरङ्गिकान्तरचरन्न | १२ |
| तोयान्तरुल्ललित | १२ | नीरं नीरधरानीके | ५१ |
| त्यक्तं जीवितमेतया | ४९ | नेत्रद्वन्द्वं शरौघाः | ६२ |
| त्यज कठिनतामेतामाशु | २१ | नैषास्मीति मया विना | ७६ |
| त्वद्वक्त्रशारद | ५७ | पटान्तेनावृत्य स्वमुख | ७८ |
| त्वां नता स्मर | ८१ | पतद्भच्छन्निरालम्वान् | ५० |
| त्रैलोक्ये त्वतिरूप | ४९ | पत्युर्मुखं सखि | ६० |
| दधत् कान्ति रम्या | ६४ | पत्युः संगमसंभवं | ८८ |
| दन्तचन्द्रिकया नूनं | ६ | पत्युर्वाक्यं श्रुतमपि | ५८ |
| दयिततममपि स्वं | ३४ | पत्यौ नम्रे विरमति | ४१ |
| द्वित्रैरेव हि वासरैः | ९८ | पप्रच्छागतसाध्वसः | ७७ |
| 'दीनेऽस्मिन् नववल्लभे | ८० | पपौ कान्तावक्त्र | ६४ |
| दुकूले प्रतिकूलं मे | ८२ | परिमलमिलिता | ५९ |
| दोलत्कुण्डलचञ्चलांशु | ५२ | परं विरहनिर्घृणः | ५५ |
| दृष्ट्वा कान्तपराजयं | १७ | पश्चाच्चित्ररतावसान | ९४ |
| धन्यः कोऽपि | ४८ | पान्थ प्राणहरं प्रसून | २९ |
| धार्यन्तेऽपि मया | ३५ | पान्थानुत्कलिका | ४७ |
| धारायन्त्रतुषारसार | ३१ | पान्थस्त्रीणामनिष्टाः | ५६ |
| धैर्यं धेहि निरन्तरं | ४५ | पास्यामि पार्वणसुधाकर | १२ |
| ध्यानं कुर्वन्ति | ४८ | पीत्वा ममाधररसं | ५४ |
| नक्तं भुक्तं विभुक्तं | ८४ | पीनस्तनी सकल | १० |
| नागर्यः स्वर्णगौर्यो (Footnote p.16) | १ | पीनोत्तुङ्गस्तनेन | ७५ |
| नाद्याप्येष समागतः | २० | पूर्णाम्भः कुम्भभाराः (Footnote. p.16) | १ |
| नानामोहनपण्डितेन | ९७ | प्रणतिनिरतः कान्तः | १८ |
| निगूढविहितस्मिता | ६३ | प्रत्यञ्चीयति चेषुधायति | ६१ |
| निर्गत्यावसथादहं | २६ | प्रत्यादिष्टमहावियोग | ५ |


P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

प्रयाते हृन्नाथे ७८
प्राग्ग्रामे पुनरागतास्मि ९२
प्राणास्तां न ४९
प्राणेश्वरे समायाते ९१
प्राप्ते प्रेमणि लीनतां १५
प्राप्योच्चैर्विलसत्सुवर्णि १०१
प्रियतम न ते युक्तं ८९
प्रियसखि कृतो १८
प्रिये कुचौ कुङ्कुम २४
प्रियेण रतनाथेन १६
प्रोन्मीलत्सप्तपर्ण ५६
प्रौढा पीनपयोधरोरु ७३
बद्ध्वा दृढं रशनया ८५
बाणेना मृदुना दुनोति ८०
बाला बलादपि ८६
बाला बालसखीजनेन ४
बालायाः शनकै- २७
बाल्यं जित्वातिचक्रे ६२
बिभ्राणा करिकुम्भतुङ्ग १००
भजस्व मुदमद्भुतां १९
भर्ता धर्ता विहर्ता ८४
भवति चलिते ८९
भूयोभिर्दिवसैरयं ३८
भूयो भूयो भव ४०
भ्रूवल्ली नयनं ६१
भो पान्थ भ्रान्तचेताः (Footnote p.16) २
मत्तद्विरदभूपाललीला ३६
मत्तः स तेन ५४
मध्येऽसौ सुकृशा ९३
मध्ये संगतयोस्तव ४३
मध्यं क्वापि गतं ४४
मन्दावर्तितकन्धरा ८
मन्दं मन्दं निभृत ३३
ममोत्सङ्गे तवैवास्तु ७
मल्लीजालविलासलालन ३०
मातः किं करवाणि २६
मातर्मे न परा ४४
मानिन्यो धृतभूरिमान ८८
मानं मानिनि मुञ्च ७९
मामैवं वद दुर्वचः ७६
मार्गं वीक्ष्य विलोचनो २०
मुकुरिततरावङ्कस्थां ८९
मुक्ता मुक्तलता ८३
मुक्ता मुक्तलतेयं ८४
मुक्तांशुकां तदुचितं ५४
मुग्धां नाथ वृथा ७६
मुग्धे साधु विधेहि ९५
मुञ्चन्ती नयनाम्बु २९
मूर्छामाप पुनर्विबुध्य २९
मेखला मे खला ८२
मेघोन्मुक्तपृषत्सु ४७
मोह्यन्ते योगिनो येन ६७
यत् पीतं मुख २७
यत्रादौ कलमेखला ९३
यद्रूपं द्रष्टुमिन्द्रो (Footnote p. 16) २
ययौ सहायोऽथ २५
यस्याः सौन्दर्यराशिं (Footnote p.16) २
यावन्मातरहं ३९
यास्यामीत्यभिधाय २०
युग्मं कुण्डलयोर्ल्लौ १७
युञ्जानो विजयी १
रतान्ते संमीलन्नयन ६४
रथो वामाक्षीयं ७०
रमस्व पतिसंगता १९
रात्रौ यत्सखि कौतुकं १४
रुद्धो लोचनवारि ६५
रोमाली ललिता ४३
लावण्यसलिलापूरा ६८
लावण्याम्बुपरिप्लुतेय ९३
लीलायितेन मलया ८७
लोके विश्रुतकीर्तयो १००
वक्त्रं कामादधरमधुरं ३३


P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

| | | | |
|---|---|---|---|
| वक्त्रेन्दुच्छत्रमीष | ६२ | शय्यायां शयितां | ७७ |
| वक्त्रे वाणीं रचय | ४० | शय्यायां स्मररागमागत | १५ |
| वक्रोक्त्या च सरस्वती | ४२ | शरदि सुखविभूत्यै | ५९ |
| वर्तन्ते त्वयि संतत | ७६ | शिरसि विधूतं भूयः | २२ |
| वत्सोवाली मृगाक्षी (Footnote p.16) | २ | शीतर्तुभीतस्तत्र | ७४ |
| वध्वा सार्धमगार | ४८ | शीतं सुगन्धि मरुपान्थ | १२ |
| वह्निं प्रोषितभर्तृका | ४६ | श्रीखण्डागुरुधूपवास | ३१ |
| वस्त्रान्ते क्व नु | २७ | श्रीहर्षः सुहृदां | १०१ |
| वक्षोजन्मकिशोरकौ | ८ | श्रुत्वा कोकिलया कृतं | २९ |
| वक्षोजन्मशिलोच्चयौ | ५३ | श्रोणीभरालसगति | १० |
| वक्षोजा चलयातिनी | ४३ | षष्ठो जैत्रशरः | २ |
| वक्षोजावियमुन्नतौ | ९३ | सखि परिहृता व्रीडा | २२ |
| वक्षोजौ हेमकुम्भौ | ६२ | सखीदं कौतुकं | ९१ |
| वातः प्रगेऽतरलयत् | ३ | सखीजनमनीदृशं | ६३ |
| वान्ति प्रातरनङ्गसङ्गर | ३० | सद्वासः परिधेहि | ९५ |
| वार्तालिङ्गनचुम्बनानि | १५ | सफलय ममाबन्धं | २१ |
| वार्तासु तस्य निरता | ११ | समागतः पूर्णमनोरथासि | ९६ |
| वासः स्वच्छमकञ्चुका | ३१ | सव्रीडा भवती | ९ |
| वासावासविलास | ९० | सस्मेरं सकलं | २७ |
| वासो वासोचितं | ८४ | साकं केन रतं | ९ |
| विद्वानप्युचितं | ३८ | सव्रीडा समुदेव | ३५ |
| विद्रावयति संपूर्णो | ६ | सानन्दं तडिदङ्गना | ४८ |
| विभाव्य दयितामुखं | ३२ | सानन्दा भव सादरा | ९७ |
| विलासावासान्तः | ७१ | सा पश्यति प्रियतमा | १३ |
| विलोक्य तां मन्मथ | २५ | सामोदानि निधेहि | ९५ |
| विविधकरणैर्मानं मुक्त्वा | ६९ | साहारा भव भूषिता | ९७ |
| विश्रब्धं परिरब्ध | ३९ | साहारेषु मनोऽवलेप | ९ |
| विसर्जय सुदुर्जनं गणय | १९ | स्निग्धः सायं करतल | ३३ |
| वेगातिदुःसहविदारण | १३ | सुखेनासीनायाः | ७१ |
| वैद्यस्ते दयितः | ४५ | सुतनु मनसि मानं | ३४ |
| व्यस्ते सायकपञ्चके | २ | सुरभिघुसृणमिश्रं | ५९ |
| व्यावल्गत्कान्ति | ७२ | सुवर्णपङ्करुह | २४ |
| व्यूढप्रौढकदम्बपुष्प | ४६ | सुस्पर्शश्च वने नयन् | ४६ |
| शक्तोऽयं सुपयोधरस्तव | ५२ | सुस्पर्शाः शालिगोपी | ५६ |
| शर्मप्रेम तनोतु | २ | सोत्कण्ठं कण्ठदेशे | ७५ |
| शय्या पुष्पमयी | ३१ | सौजन्ये निरताः खलेषु | १०० |


P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

| | |
|---|---|
| सौम्या वृत्तनितम्ब | ७३ |
| सौवर्णनूपुररण- | १० |
| सौहार्दान्मधुमत्यजन् | १ |
| संकोचयत्यनिभृतानि | ८६ |
| संगृह्याञ्जनमञ्जितेन | २८ |
| संप्राप्तं मनसो | ४३ |
| संमृज्यन्ते रुचिररचनाः | ५८ |
| संवर्म्य सम्यगपि | १३ |
| संसर्पद्भिरहाग्नि | ९० |
| संस्पर्श्यैत मुहुर्मुहुः | ७७ |
| स्तनाननं संस्पृशति | २५ |
| स्तनौ स्तनान्तरन्यस्तौ | ७ |
| स्मरक्रीडाजन्य | ६४ |
| स्वप्नेषु प्रतिरात्रि | ९२ |
| स्वर्गादप्यतिदुर्लभं | २ |
| स्निग्धं मुग्धे रचय | ४० |
| स्त्रीणामीदृगपाटवं | ४५ |
| स्वेनैव या वरकुच | १३ |
| स्थैर्यं भजन्नति | ३ |
| हठेनाश्लिष्टायाः | ७१ |
| हर्षोत्कर्षं गमय | ४१ |
| हीनस्नेहरसेन रुक्षदशया | ७९ |
| हेमन्तकान्तमदनं | ८७ |
| हेमन्ततौ स्वभर्तुर्निशि | ७५ |
| हेमन्ते वान्ति वाता | ७२ |
| हेमन्ते हिमहारिणी | ७३ |
| ह्रिया विनमितानना | ६३ |


★

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# NOTES

श्लो. १. अन्वयः—विजयी कामः कौसुमकार्मुकं करतले कृत्वा, कान्ताकान्तकपोलमण्डलतले पत्रावलीकर्मणि कामिनोऽधिकं युञ्जानो, रत्याऽनिशमनुयातः, जगन्ति मदयन्, सौहार्दान्मधुमत्यजन् हि, भुवि भवतां सौख्याय भूयात्।

विजयोऽस्यास्तीति विजयी। "अत इनिठनौ"। काम्यतेऽनेन पुंसि संज्ञायां घः, कामः। कुसुमस्येदम् कौसुमम् "तस्येदम्" सूत्रेणाण्। कर्मणे प्रभवति, इति कार्मुकम्-"कर्मण उकञ्" सूत्रेण उकञ् प्रत्ययः आदिवृद्धिश्च। युङ्क्ते इति युञ्जानः-"लटः शतृशानचौ." इति शानच्। करस्य तलं तस्मिन् करतले। कृधातोः क्त्वा प्रत्ययः "समानकर्तृकयोः पूर्वकाले क्त्वा"। कान्तौ च तौ कपोलौ च कान्तकपोलौ, कान्तायाः कान्तकपोलौ, तयोर्मण्डले (मण्डलौ वा)। मण्डयतीति मण्डलम्। वृषादित्वात् कलच्। तयोस्तलं, तस्मिन् पत्राणामावली, तस्याः कर्म, तस्मिन्, कामोऽस्त्यस्येति कामी, तस्य कामिनः। अनुयात इत्यत्र कर्तरि क्तः, "गत्यर्थाकर्मक०" सू.।

मदयतीति मदयन् शतृ०। शोभनं हृदयं यस्य सः सुहृत्, तस्य सुहृच्छब्दस्य सप्तम्यर्थे भवार्थे "तत्र भव" इति सूत्रेणाण्। अनुशतिकादित्वादुभयपदस्य वृद्धिः। सुहृदि भवं सौहार्दं, तस्मात् सौहार्दात्। अथवा इदमर्थेऽण्। त्यजतीति त्यजन्, न त्यजन् अत्यजन्, शतृ०। सुखस्य भावः कर्म वा सौख्यम्, ष्यञ्-तस्मै सौख्याय. भवतां भूयात्।

पत्रावली (पत्रभङ्गः) पत्राणां पत्राकृतीनामावली श्रेणी राजिर्वा।

'कामः पञ्चशरः स्मर' इत्यमरः।

The reading सौहार्दामधुम् of the Ms. has been emended by ° र्दान्मधु. ° The sense requires पञ्चमी. The omission of 'न्' from न्म must be due to the carelessness of the scribe.

This is a मङ्गल or benedictory verse. According to दण्डिन, a महाकाव्य 'begins with' आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्' (का. द, प. १, श्लो. १४.). This, however, holds good about all literary works. In this connection the following sentence is generally quoted from the महाभाष्य of पतञ्जलि-"मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते वीरपुरुषाण्यायुष्मत्पुरुषाणि च भवन्ति अध्येतारश्च प्रवक्तारो भवन्ति।"

Dr. A. B. Dhruva in his Notes on स्याद्वादमञ्जरी discusses this topic in some detail which, being very instructive, I quote below:

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

